# Atithisevamahatmyam

# અતિથિસેવામાહાત્મ્યમ્

## Document Information

Text title : Atithisevamahatmyam

File name : atithisevAmAhAtmyam.itx

Category : misc, brahmavaivartapurANa, mAhAtmya

Location : doc_z_misc_general

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | gaNapatikhaNDa | adhyAya 44/44-54||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 5, 2025

*sanskritdocuments.org*

# અતિથિસેવામાહાત્મ્યમ્

અતિથિઃ પૂજિતો યેન પૂજિતાઃ સર્વદેવતાઃ ।
અતિથિર્યસ્ય સન્તુષ્ટસ્તસ્ય તુષ્ટો હરિઃ સ્વયમ્ ॥ ૪૪॥

સ્નાનેન સર્વતીર્થેષુ સર્વદાનેન યત્ફલમ્ ।
સર્વવ્રતોપવાસેન સર્વયજ્ઞેષુ દીક્ષયા ॥ ૪૫॥

સર્વૈસ્તપોભિર્વિવિધૈર્નિત્યૈર્નૈમિત્તિકાદિભિઃ ।
તદેવાતિથિસેવાયાઃ કલાં નાર્હન્તિ ષોડશીમ્ ॥ ૪૬॥

અતિથિર્યસ્ય ભગ્નાશો યાતિ રુષ્ટશ્ચ મન્દિરાત્ ।
કોટિજન્માર્જિતં પુણ્યં તસ્ય નશ્યતિ નિશ્ચિતમ્ ॥ ૪૭॥

સ્ત્રીગોઘ્નશ્ચ કૃતઘ્નશ્ચ બ્રહ્મઘ્નો ગુરુતલ્પગઃ ।
પિતૃમાતૃગુરૂણાં ચ નિન્દકો નરઘાતકઃ ॥ ૪૮॥

સન્ધ્યાહીનઃ સ્વઘાતી ચ સત્યઘ્નો હરિનિન્દકઃ ।
બ્રહ્મસ્વસ્થાપ્યહારી ચ મિથ્યાસાક્ષ્યપ્રદાયકઃ ॥ ૪૯॥

મિત્રદ્રોહી કૃતઘ્નશ્ચ વૃષવાહશ્ચ સૂપકૃત્ ।
શવદાહી ગ્રામયાજી બ્રાહ્મણો વૃષલીપતિઃ ॥ ૫૦॥

શૂદ્રશ્રાદ્ધાન્નભોજી ચ શૂદ્રશ્રાદ્ધેષુ ભોજકઃ ।
કન્યાવિક્રયકારી ચ શ્રીહરેર્નામવિક્રયી ॥ ૫૧॥

લાક્ષામાંસતિલાનાં ચ લવણસ્ય તિલસ્ય ચ ।
વિક્રેતા બ્રાહ્મણશ્ચૈવ તુરગાણાં ગવાં તથા ॥ ૫૨॥

એકાદશીકૃષ્ણસેવાહીનો વિપ્રશ્ચ ભારતે ।
એતે મહાપાતકિનસ્ત્રિષુ લોકેષુ નિન્દિતાઃ ॥ ૫૩॥

કાલસૂત્રે ચ નરકે પતન્તિ બ્રહ્મણાં શતમ્ ।
એતેભ્યોઽપ્યધિકઃ સોઽપિ યશ્ચાતિથિપરાઙ્મુખઃ ॥ ૫૪॥

ઇતિ બ્રહ્મવૈવર્તપહરાણે ગણપતિખણ્ડે ચતુશ્ચત્વારિંશાધ્યાયાન્તર્ગતં
અતિથિસેવામાહાત્મ્યં સમાપ્તમ્ ।

બ્રહ્મવૈવર્તપુરાણ । ગણપતિખણ્ડ । અધ્યાય ૪૪/૪૪-૫૪॥

brahmavaivartapurANa . gaNapatikhaNDa . adhyAya 44/44-54..

Proofread by PSA Easwaran

*Atithisevamahatmyam*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*